**मुख्यवार्ता:-**

- **प्रधानमन्त्रिणा नरेन्द्रमोदिना गया-नगरे प्रायः त्रयोदश-सहस्रकोटि- रूप्यकाणां बहुविधविकासपरियोजनाः उद्घाटिताः; आपरेशन् सिन्दूर् इत्यनेन भारतस्य रक्षा-कार्यनीतेः नूतनः मार्गः अङ्कितः इति च कथितम्।**

- **रक्षामंत्री राजनाथसिंहः संयुक्तराष्ट्रसङ्घस्य महिला-सैन्य- अधिकारिभिः सह मिलितवान्; लैङ्गिक-समानतायाः विश्वशान्तेः च विषये संयुक्तराष्ट्रसङ्घस्य प्रयत्नेभ्यः भारतस्य समर्थनस्य प्रतिज्ञां ज्ञापितवान्।**

- **भारते चीनदेशस्य राजदूतः शू-फेहोङ्ग् इत्येषः आशां प्रकटितवान् यत् प्रधानमन्त्रिणः मोदिनः एस. सी. ओ. इति शिखरसम्मेलने आगमनं भारत-चीन-द्विपाक्षिकसम्बन्धेषु नूतनीकरणं जनयिष्यति इति।**

- **श्रीलङ्कादेशस्य पूर्वराष्ट्रपतिः रनिल-विक्रमसिंघे इत्येषः सार्वजनिकधनस्य उपयोगमुद्दिश्य बन्धितः।**

**पीएम-बिहार**

प्रधानमन्त्री नरेन्द्रमोदी अद्य अवदत् यत् आपरेशन् सिन्दूर् इत्यनेन भारतस्य रक्षा-कार्यनीतेः नूतनः मार्गः अङ्कितोऽस्ति। श्रीमोदी अवदत् यत् आतङ्कवादं भारते प्रेषयित्वा, आक्रमणस्य योजनां कृत्वा वा कोऽपि पलायितुं न शक्नोति। सः अवदत् यत् आतङ्कवादिनः भूमिस्थाः भूत्वा प्रच्छन्नाः स्युश्चेदपि, भारतस्य क्षिपण्यस्त्राणि तान् अन्विष्यन्तीति।

अद्य बिहार्-राज्यस्य गया-नगरे द्वादशसहस्रकोटिरूप्यकाणां बहुविधविकासपरियोजनानां शिलान्यासोद्घाटनानन्तरं प्रधानमन्त्रिणा एतदुक्तम्। विद्युत्, मार्गः, स्वास्थ्यं, नगरीयविकासः, जलापूर्तिः इत्याद्यः बहुविधक्षेत्राणां परियोजनाः सन्ति। श्रीमोदी गया-दिल्ली-नगरयोर्मध्ये अमृतभारत-एक्स्प्रेस्-रेल्-यानस्य, वैशाली-कोडेर्मा-नगरयोः मध्ये बौद्ध-सर्किट्-रेल्-यानस्य च ध्वजप्रदर्शनपूर्वकं शुभारम्भं कृतवान्। देशे उत्कोचग्रहितॄणां वर्धमानसङ्ख्या गभीरचिन्तायाः विषयः अस्तीति श्रीमोदी अवोचत्। बिहारस्य सीमावर्तिनां मण्डलानां जनसांख्यिकीयविवरणं द्रुतगत्या परिवर्तते इति सः अधोरेखितवान्। उक्तवान् च यत् सर्वकारेण राष्ट्रस्य भविष्यनिर्माणस्य दायित्वं उत्कोचग्रहितृभ्यः न दातुं संकल्पः कृतोऽस्तीति। प्रधानमन्त्री अवदत् यत् बिहारस्य द्रुतगत्या विकासः केन्द्रस्य एन्. डी. ए-सर्वकारस्य प्रमुखप्राथमिकता अस्तीति। अद्य बिहार्-राज्ये आरब्धाः परियोजनाः बिहारस्य उद्योगान् सुदृढं करिष्यन्ति, युवभ्यश्च नूतन-वृत्यवसरान् च कल्पयन्तीति सः अवदत्। विगतैकादशवर्षेषु, सम्पूर्णे देशे चतुर्कोट्यधिकेभ्यः निर्धनपरिवारेभ्यः स्थायिगृहाणि दत्तानि बिहार्-राज्ये च अष्टत्रिंशल्लक्षाणि गृहाणि निर्मितानीति श्रीमोदी अधोरेखितवान्। सः अवदत् यत् एन्. डी. ए. इत्यस्य द्विगुणितचालकशक्तियुतं प्रशासनं बिहार-राज्ये रेल्-मार्गस्य विकासाय द्रुतगत्या कार्यं कुर्वदस्तीति।

सः अवदत् यत् अमृतभारत्-स्थानक-योजनान्तर्गतं गया-रेलस्थानकस्य आधुनिकीकरणं भवति तथा च यात्रिकान् विमानस्थानकसदृश-सुविधाः प्रददातीति।

**प्रधानमन्त्री-कोलकाता**

प्रधानमन्त्री नरेन्द्रमोदी कोलकातायामपि द्विशताधिक-पञ्चसहस्र- कोटिरुप्यकाणां विभिन्नविकासपरियोजनानां शिलान्यासं उद्घाटनञ्च अकरोत्। अत्रावधौ प्रधामन्त्री त्रयाणां मेट्रोसेवानां शुभारम्भमपि विहितवान्। प्रधानमन्त्रिणा हावड़ा-मेट्रो-स्थानकोपरि एकस्य उपमार्गस्य उद्घाटनञ्चापि कृतम्।

**महिलानां विषये राजनाथसिङ्घः**

रक्षामंत्री राजनाथसिंहः अवदत् यत् भारतदेशः संयुक्तराष्ट्रसङ्घस्य शान्तिरक्षा-कार्येषु महिलानां सहभागित्वस्य एकीकरणस्य च प्रबलसमर्थकः अस्तीति। श्रीसिङ्हः अद्य नवदेहल्यां संयुक्तराष्ट्रसङ्घस्य महिला-सैन्य-अधिकारिभिः सह वार्तालापं कुर्वन् एतत् उक्तवान्। सः अवदत् यत् देशस्य सशस्त्रदलेषु शान्तिरक्षा-दलेषु च महिलानां सहभागितां प्रोत्साहयितुं सर्वकारः नीतिं सुदृढं कुर्वन् अस्ति, येन तेषां नेतृत्वस्य सेवायाश्च समानः अवसरः भवेदिति सुनिश्चितं भवति।

**सर्वोच्चन्यायालय-परित्यक्तशुनकाः**

सर्वोच्चन्यायालयेन दिल्ली-एनसीआरक्षेत्रे परित्यक्तशुनकानां पुनर्वाससम्बद्ध-निर्देशेषु संशोधनं विहितम्। स्वकीये नूतनादेशे विक्रमनाथः, सन्दीपमेहता, एन्.वी.अञ्जारिया इत्येतेषां न्यायाधीशत्रयाणां पीठेन निर्दिष्टम् यत् रेबिज़ - रोगग्रस्तान् उग्रस्वभावकान् शुनकान् विहाय अन्येषां परित्यक्तशुनकानां रोगप्रतिरोधकटीकाकरणं, वन्ध्याकरणञ्च कृत्वा ते स्व-स्वक्षेत्रेषु च विमोचनीयाः।

**चीन-राजदूतः**

चीन-देशस्य राजदूतः शू-फेहोङ्ग् इत्ययम् अवदत् यत् गतवर्षे कज़न्-नगरे उभयदेशयोः नेत्रोः मेलनात्परं भारत-चीन-देशयोः सम्बन्धेषु निरन्तरं परिष्कारः विकासश्च समजायत। नवदिल्ली-नगरे पञ्चविंशत्यधिक-द्विसहस्रतमं एस्.सी.ओ. शिखरसम्मेलनं सम्बोधयन् श्रीफेहोङ्ग् इत्येषः अवदत् यत् द्वयोः देशयोः मध्ये आदानप्रदानम् सहकारश्च क्रमेण विविधक्षेत्रेषु पुनः आरभत, एतस्य परिणामस्वरुपं सकारात्मकपरिणामाः प्रादुर्भूताः । सः आशां प्रकटितवान् यत् एस्.सी.ओ. शिखरसम्मेलने प्रधानमन्त्रिणः श्रीमोदिनः यात्रा भारत-चीन-द्वैपाक्षिकसम्बन्धान् नूतनगतिं प्रदास्यतीति।

**श्रीलंका राष्ट्रपतिः**

श्रीलङ्का-देशस्य पूर्वराष्ट्रपतिः रनिलविक्रमसिंघे इत्येषः कोलम्बो-नगरे अपराध-अन्वेषण-विभागस्य समक्षं उपस्थितः अभवत्, अनन्तरञ्च आरक्षकैः निगडितः। श्रीविक्रमसिंघे इत्येषः लण्डन-नगरस्य व्यक्तिगतयात्रायाः व्ययं पूरयितुं राज्यधनस्य उपयोगम् अकरोदिति आरोपैः सह एतत् निगडनं सम्बद्धमस्ति।

**शुभांशु शुक्लः**

ग्रूप्-क्याप्टन् शुभांशु शुक्लः अद्य राष्ट्रपतिभवने राष्ट्रपतिना द्रौपदीमुर्मु इत्यनया सह मिलितवान्। ग्रूप्-क्याप्टन् शुक्लः राष्ट्रपतिना सह अन्तरिक्षस्य स्वानुभवान् व्यञ्जयत्। अवसरेऽस्मिन् ग्रूप्-क्याप्टन् प्रशान्त् बालकृष्णन् नायरः, ग्रूप्-क्याप्टन् पुण्यश्लोक बिस्वालः, इस्रो इत्यस्य अध्यक्षः, अन्तरिक्षविभागस्य सचिवः च डा. वि. नारायणनः, मानव-अन्तरिक्ष-उड्डयनकेन्द्रस्य निर्देशकः दिनेशकुमारसिङ्घश्च उपस्थिताः आसन्।

**प्रशासन-चिप संरचना**

देशस्य सेमिकण्डक्टर्-विन्यास-क्षमतां वर्धयितुं सर्वकारेण विन्यास-सम्बद्ध-प्रोत्साहन-योजनान्तर्गतम् त्रयोविंशतिः चिप्-विन्यास- परियोजनाः अनुमोदिताः सन्ति। इलेक्ट्रानिक्स् अथ आई. टी. मन्त्रालयः अवदत् यत् द्विसप्ततिः संस्थाः स्वकीय- चिप्-विन्यास-परियोजनाभ्यः उद्योग-मानक-इलॅक्ट्रानिक्-डिजाइन-आटोमेशन इति उपकरणानि प्राप्तवन्तः इति।

**ऋतुविज्ञानविभागः**

अद्य बिहार-पूर्वीराजस्थान- पश्चिमबङ्ग-गङ्गातटीयक्षेत्रेषु सहैव गुजरात-झारखण्ड- पूर्वोत्तरभारतराज्यानां कतिपयभागेषु च महतीवृष्टिः भविष्यतीति ऋतुविज्ञानीयविभागेन अनुमितम्। दिल्ली–एनसीआर्- हरियाणा-चण्डीगढ़- जम्मु-कश्मीर-सिक्किम- गोवा-मध्यप्रदेशेषु चापि आगामिषु द्वित्रिदिवसेषु विभागेन अतिवृष्टिः सम्भाव्यते।

**।। इति वार्ता ।।**